शजाः। समाः सूर्य्यात् पूर्ब्ववत् स्यादेभ्योऽप्यायुरथांशजे। दृष्टग्रहलवाल्लिप्ता दशभक्ताश्च यत् फलम्। वर्षमासादिकं ज्ञेयं भवेद् द्वादशभिः स्फुटम्। जैवे परायुः समांशो ग्रहायुः परमोच्चगे। लग्नमशसमन्वायुर्दद्याद्वीर्य्ययुतं च भैः। सर्वमर्द्धं तृतीयोऽंशः पादः पञ्चाङ्गभागकौ। व्ययाद्वामं विमीयेत पापे त्वर्द्धं शुभग्रहे। एकभावगतानां यो बली भागहरस्तु सः। अर्द्धमस्तं गतो हन्ति त्यक्त्वा शुक्रशनैश्चरौ। कुजन्त्यक्त्वा शत्रुभस्थैस्त्रिभागो नाश्यते निजः। लग्ने सपापैः लग्नस्थनवांशम्नाद्ध्रायुषः। अष्टोत्तरः शतांशः स्याद्धीनः सौम्येक्षिते दलम्। उच्चचक्रगतास्त्रिघ्नं द्विघ्नं स्वांशोत्तमादिगाः। ददत्यायुर्ग्रहास्ते चेद्वृद्धौ नित्यं स्वभादिगाः। अपि त्रिद्वेग्रकगुणदाः केन्द्रादाविति केचन। लग्ने सपापे हानिर्या नासावंशभवायुषि। हानिद्वयेऽधिकैव स्याद्गुणोऽप्येवं वराहगोः। स्वार्काःपरायुर्नरदन्तिनोः १२० स्याद्दन्ता ३२ हयानां च जिना २४ वृषादेः। खरोष्ट्रयोस्तत्त्वसमाः २५ शुनोऽर्का १२ व्याघ्राद्यजादेर्हि नृपाः १६ परायुः। आयुर्न्यत्र समानीय स्वस्वपूर्णायुषा हतम्। नृपरायुर्हृतं स्पष्टं गजाद्यायुर्भवेदिति। दीपस्तैलादियुक्तोऽपि यथा वाते विनश्यति। अजितेन्द्रियतापथ्यैरेवमायुर्विनश्यति"।

अत्र हयानां दन्तैर्यथायुर्ज्ञानं तथोक्तमश्वशब्दे ५०२ पृष्ठे जयदत्तकृताश्वशास्त्रात्तद्विशेषोऽत्र गन्तव्यः। दन्ताद्वात्रिंशद्वर्षा इतीहक्रम्

इत्यमायुश्च सदाचारादेव, अपथ्याजितेन्द्रियादिभ्यस्तु आयुःसत्त्वेऽपि नाशः उक्तजातकपद्धतिवचनात् अतएव भा० आनु०प० १०४ अध्याये सदाचारादितएव आयुर्वृद्धिरुक्ता "शतायुरुक्तः पुरुषः शतवीर्य्यश्च जायते। कस्मान्म्रियन्ते पुरुषा बाला अपि पितामह!। आयुष्मान् केन भवति अल्पायुर्वाऽपि मानवः। केन वा लभते कीर्त्तिं केन वा लभते श्रियम्। तपसा ब्रह्मचर्य्येण जपहोमैस्तथौषधैः। कर्म्मणा मनसा वाचा तन्मे ब्रूहि पितामह!। भीष्म उवाच। अत्र तेऽहं प्रवक्ष्यामि यन्मां त्वमनुपृच्छसि। अल्पायुर्येन भवति दीर्घायुर्वाऽपि मानवः। येन वा लभते कीर्त्तिं येन वा लभते श्रियम्। यथा वर्त्तयन् पुरुषः श्रेयसा सम्प्रयुज्यते। आचाराल्लभते चायुराचाराल्लभते श्रियम्। आचाराल्लभते कीर्त्तिं पुरुषः प्रेत्य चेह च। दुराचारो हि पुरुषो नेहायुर्विन्दते महत्। यस्मात्त्रस्यन्ति भूतानि तथा परिभवन्ति च। तस्मात् कुर्य्यादिहाचारं यदीच्छेद्भूतिमात्मनः। अपि पापशरीरस्य आचारो हन्त्यलक्षणम्। आचारलक्षणो धर्म्मः सन्तश्चारित्रलक्षणाः। साधूनाञ्च यथा वृत्तमेतदाचारलक्षणम्। अप्यदृष्टं श्रवादेव पुरुषं धर्म्मचारिणम्। भूतिकर्म्माणि कुर्व्वाणं तं जनाः कुर्व्वते प्रियम्। ये नास्तिका निष्क्रियाश्च गुरुशास्त्राभिलङ्घिनः। अधर्म्मज्ञा दुराचारास्ते चरन्ति गतायुषः। विशोका भिन्नमर्य्यादा नित्यं सङ्कीर्णमैथुनाः। अल्पायुषो भवन्तीह नरा निरयगामिनः। सर्व्वलक्षणहीनोऽपि समुदाचारवान्नरः। श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति। अक्रोधनः सत्यवादी भूतानामविहिंसकः। अनसूयुरजिह्मश्च शतं वर्षाणि जीवति। लोष्टमर्द्दी तृणच्छेदी नखखादी च यो नरः। नित्योच्छिष्टः सङ्कुसुको नेहायुर्व्विन्दते महत्। ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत्। उत्थायाचम्य तिष्ठेत पूर्व्वां सन्ध्यां कृताञ्जलिः। एवमेवापरां सन्ध्यां समुपासीत वाग्यतः। नेक्षेतादित्यमुद्यन्तं नास्तं यान्तं कदाचन। नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम्। ऋषयो नित्यसन्ध्यत्वाद्दीर्घमायुरवाप्नुवन्। तस्मात्तिष्ठेत्सदा पूर्व्वां पश्चिमाञ्चैव वाग्यतः। ये न पूर्व्वामुपासीरन् द्विजाः सन्ध्यां न पश्चिमाम्। सर्व्वांस्तान् धार्म्मिको राजा शूद्रकर्म्माणि कारयेत्। परदारा न गन्तव्याः सर्व्ववर्णेषु कर्हिचित्। नहीदृशमनायुष्यं लोके किञ्चन विद्यते। यादृशं पुरुषस्येह परदारोपसेवनम्। यावन्तो रोमकूपाः स्युः स्त्रीणां गात्रेषु निर्म्मिताः। तावद्वर्षसहस्राणि नरकं पर्य्युपासते। प्रसाधनञ्च केशानामञ्जनं दन्तधावनम्। पूर्व्वाह्ण एव कार्य्याणि देवतानाञ्च पूजनम्। पुरीषमूत्रे नोदीक्षेन्नाधितिष्ठेत् कदाचन। नातिकल्यं नातिसायं न च मध्यन्दिने स्थिते। नाज्ञातैः सह गच्छेत नैकोन वृषलैः सह। पन्था देयो ब्राह्मणाय गोभ्यो राजभ्य एव च। वृद्धाय भारतप्ताय गर्भिण्यै दुर्ब्बलाय च। प्रदक्षिणं प्रकुर्व्वीत परिज्ञातान् वनस्पतीन्। चतुष्पथान् प्रकुर्व्वीत सर्व्वानेव प्रदक्षिणान्। मध्यन्दिने निशाकाले अर्द्धरात्रे च सर्व्वदा। चतुष्पथं न सेवेत उभे सन्ध्ये तथैव च। उपानहौ च वस्त्रञ्च धृतमन्यैर्न धारयेत्। ब्रह्मचारी च नित्यं स्यात् पादं पादेन नाक्रमेत्। अमावास्यां पौर्णमास्यां चतुर्द्दश्याञ्च सर्व्वशः। अष्टम्यां सर्वपक्षाणां ब्रह्मचारी सदा भवेत्।। वृथा मांसं न खादेत पृष्ठमांसं तथैव च। आक्रोशं परिवादञ्च पैशुन्यञ्च विवर्ज्जयेत्। नारुन्तुदः स्यान्